International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 246-248
© 2025 IJMH
www.themultijournal.com
Received: 04-12-2025
Accepted: 29-12-2025
Publish : 30-12-2025

**दुर्योधन रणा**
शोधच्छात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**दुर्योधन रणा**
शोधच्छात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# मनुस्मृतौ आचारनैतिकभावस्य लोकोपयोगित्वम्

**दुर्योधन रणा**

**शोधसारः**

सामाजिकविधिव्यवस्थायाः प्राचीनसाक्ष्यमनुस्मृतिः स्मृतिशास्त्रत्वेन मानवसमाजाय विधिवत्सा-माजिकाङ्गतया जीवनयापनप्राणाल्याः प्रमुखमङ्गत्वेन विद्यते। समाजे विद्यमानानां समेषां जनानामैक्यदयाकरुणादानधर्माद्याचरणं सुतरां युक्तियुक्तत्वमुपयाति। अतोऽस्य समाजस्य सर्वोत्कृष्टोन्नतिसाधननिमित्तं सामाजिकसंरचनायाः मूलस्रोतस्त्वेन मनुस्मृतिः सुतरां लोकोपयोगाय प्रवर्तते। अत्र प्रोक्ताश्रमव्यवस्थायाः योगदानं साम्प्रतिकस्थितावपि बहुधा अनुमीयते। प्राचीनकाले जीवनस्य सुष्ठुक्रियान्वयनार्थं वर्णव्यवस्थाः आश्रमव्यवस्थाः मुनिभिः परिकल्पिताः वर्तन्ते। अतः तत्सर्वं प्रायशो धर्मसूत्रग्रन्थेषु उपनिबद्धाः बभूव। स्मृतिसाहित्ये अस्य विशालसमावेशो मनुस्मृतौ प्राप्यते। मनुस्मृतौ आश्रमव्यवस्थायाः नैकं कर्म कर्त्तव्यबोधश्च सुष्ठु परिभाषते। अतः अस्य मनुस्मृतेः बहुधा सामाजोपयोगिता कांक्ष्यते। अत्रोक्तनैतिकाध्यात्मिकाधिभौतिकरहस्यानां मञ्जुलसमावेशो धार्मिकविश्वा-सस्य रूपरेखां प्रस्तौति। वेदस्मृतिसदाचारत्वेन त्रिविधनैतिकभावस्योद्रेकं स्मृतिशास्त्रे मनुना बहुधा प्रतिपादितम्। अत्रोक्तसंस्कारक्रियाविध्याश्रमधर्माणामनुसेव्यत्वं बहुधा शास्त्रान्तरेषु महत्त्वं विदधाति।

**आचारो नैतिकभावनाश्च**

धर्मशास्त्रे स्मृतिसाहित्यस्याङ्गभूताचारमीमांसा नैतिकविचारस्य आध्यात्मिकोन्नतये प्रमुखं योगदानं विदधाति। आचारः सदाचारः शिष्टाचारो वा मानवानां परमो धर्मो वर्तते। आचारवान् एव सदैव लोके द्विजेति पदेन व्याख्यायते। यस्य नैतिकाचारव्यवहारः उन्नतः स च मानवः सदैव नित्ययुक्तो सनातनो भूत्वा तिष्ठति। अतो मनुस्मृतौ आचारमीमांसायां तस्य प्रामुख्यत्वमत्र कथ्यते यत् -

**"आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।**
**तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः॥"**[1]

श्रुतिस्तु यागादिमाध्यमेनानन्तकोटिफलं द्विजेभ्यः प्रयच्छति। श्रुतिबोधितकर्माणि बहुधा स्वर्गादिष्टफलसाधनभूतानि कारणानि प्रदर्शयति। अतो स्मृतिषु कथ्यते यदि आचारो न युज्यते तर्हि वेदफलेष्वपि फलभाग् न भवितुमर्हति। अतो नित्यमाचारयुक्तो शीलयुक्तो वा भवेत्। तदनु शिष्टानामाचारं सुतरां जीवने साधयेत्। आचारसंयुक्तो जनो सदैव नित्यसम्पूर्णफलभाग् भवितुमर्हति एवञ्च वेदफलमपि प्राप्नोति। अतः कथ्यते

**"आचाराद् विच्युतो विप्रो न वेदफलमश्नुते।**
**आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत्॥"**[2]

स एवाचारः एकः प्रमुखो धर्मो यस्य च विचारः सुहृद्धर्मेति कथ्यते। असौ धर्मः निधनेऽपि जनानां प्रवृतिनिवृत्तिगतविचारमुपलक्ष्य सर्वस्मिन् कर्माणि सर्वस्मिन् विधानेन वा तस्य प्रतिपत्तिर्घटते। स च सुहृद्धर्मो निधने अपि सर्वफलं प्रददातु प्रयतते। अयमाचारधर्मः शरीरेण सह नाशं न भूत्वा अन्यत्र गच्छतीति मनोरभिमतं सुस्पष्टं परिभाषितं वर्तते। अनेन मानवसमाजाय धर्मस्य प्रतिपत्तिलक्षकं सुहृद् धर्मो निधनवेलायामप्युत्तमश्रेण्यामस्य विचारः प्राप्यते।

**"एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।**
**शरीरेण समं नाशं सर्वमन्यद्धि गच्छति॥"**[3]

असौ परमधर्मो धर्मस्य प्रमुखलक्षणेष्वन्तर्भवति। अतोऽस्य प्रामुख्यं शास्त्रेषु सुतरां श्रूयते। शास्त्रान्तरेष्वप्यस्य प्रसक्तिः पर्यवसानञ्च बहुधा द्योतते। तेन धर्मेण लोके सुखं समृद्धिः शान्तिः राज्यं धनं सम्पद् च बहुधा प्राप्यते। असौ श्रेष्ठधर्मः अन्तिमेऽपि जनानामुपकाराय एव प्रवर्तते। अतो मनुना अस्य परिभाषा बहुधा स्पष्टीकृतम्। अन्यच्च पापादप्ययं धर्मः सुतरां निराक्रियते। यतः कथ्यते

**"धर्माद्राज्यं धनं सौख्यंमधर्मात् दुःखसम्भवः।**
**तस्माद्धर्मं सुखार्थाय कुर्यात् पापं च कीर्तयेत्॥"[4]**

श्रुतिपरम्परायामपि धर्मो विश्वस्य जगतः प्रतिष्ठानिमित्तं सदैवोपकारकत्वमिति विचारो मन्त्रभागे ब्राह्मणभागेऽऽरण्यकभागे उपनिषद्भागे च बहुधा उक्तं वर्तते। अतोऽस्य धर्मस्य शाश्वतिकस्थितिः समाजस्य कृते बहुधा उपयोगाय वर्तते। धर्मस्य तत्त्वानि लोके जनानां हिताय प्रवर्तते। जनेषु व्यवस्थितभावनायाः उद्रेकनिमित्तमयं धर्मः सुतरां श्रेष्ठत्वं विदधाति। असौ धर्मो जनेभ्यः पापान्यपनोदनं कृत्वा धर्मपथ्याध्यात्म्यपथि च बहुधा प्रतिष्ठितं विदधाति। अतो धर्मः परमं श्रेष्ठं च बहुधा शास्त्रेषु कथ्यते। जनानां हिताय असौ धर्मः श्रेष्ठतां प्रामुख्यतां च भजते। अतस्तैत्तिरीयारण्यके कथ्यते यत्

**"धर्मो विश्वस्य जगतः प्रतिष्ठा।**
**लोके धर्मिष्ठं प्रजा उपसर्पन्ति ।**
**धर्मेण पापमपनुदन्ति।**
**धर्मे सर्वं प्रतिष्ठितम्। तस्माद् धर्मं परमं वदन्ति॥"[5]**

स्मृतिशास्त्रेषु प्रतिपादितवर्णादिव्यवस्थाः लोकानां धृतिशीलदमोऽस्तेयमहिंसादिमार्गोचितत्वेन धर्मस्य आधिभौतिकरहस्यं वितनोति। तत्र मन्वादिभिः स्मृतितत्त्वदर्शिभिराचारः एव परमधर्मेति तत्तु साक्षात् श्रुतिमूलत्वेन बहुधा श्लाघ्यते। सर्वेषामाश्रमाणां सर्वेषां वर्णानामाचारः सदाचारो वा परमधर्मेति सिद्धान्तमुपाश्रित्य हीनाचारस्य बहुधा विप्रतिपत्तिः कांक्ष्यते। एतदेव वशिष्ठधर्मसूत्रे बहुधा कथ्यते यत्-

**"आचारः परमो धर्मः सर्वेषामिति निश्चयः।**
**हीनाचारपरितात्मा प्रेत्य चेह च नश्यति॥"[6]**

आचारहीनस्य बहुधा दोषाः अवेदविद् रूपेण विन्यासो लक्ष्यते। यतो वेदादिशास्त्रमधीतेऽपि यदि आचारहीनो भवति तत्तु सर्वथा अन्धस्य दारा दर्शनीया वत् असमर्थत्वं बहुधा कल्प्यते। यत्तु मनुना आचारमार्गोपेत वेदः साक्षात् वेद स्मृति सदाचारत्वेन त्रिविधधर्मलक्षणं तावत् प्रतिपादितं वर्तते। यथा-

**"आचारहीनस्य तु ब्राह्मणस्य वेदाः षडङ्गास्त्वखिताः सयज्ञाः।**
**कां प्रीतिमुत्पादयितुं समर्थाः अन्धस्य दारा इव दर्शनीयाः॥"[7]**

अन्यच्च राज्यघातकं शूद्रयाजकं शूद्रार्थयाजकं वेदविप्लावकं भ्रूणहननमन्त्यवसायिभिः सह यथा कदाचिदपि न वसेत् तद्वत् आचारहीनादपि बहुधा परित्यागो लक्षितो वर्तते। उच्यते तदर्थं

**"त्यजेत्पितरं राजघातकं शूद्रयाजकं**
**शूद्रार्थयाजकं वेदविप्लावकम्।**
**भ्रूणहनं यश्चान्त्यावसायिभिः**
**सह संवसेदन्त्यावसायिन्यां वा॥"[8]**

अतस्तावत् आचारमार्गस्य भूयसि प्रशंसा शास्त्रेषु विहिता वर्तते। कीर्त्तिमुत्पादयितुमाचारमार्गे प्रणोहितचेतांसि सुतरां समेषां कीर्त्तिवर्धनयुक्तञ्च भवति। उच्यते -

**"आचारो भूतिजनन आचारः कीर्त्तिवर्धनः।**
**आचाराद् वर्धते ह्यायुराचारो हन्त्यलक्षणम्॥"[9]**

स्मृतिशास्त्रं नैतिकं तत्त्वं प्रति धृतिक्षमादमोस्तेयादिभिः धर्मस्य मार्गाः प्रस्तुताः ये च धर्मस्य मार्गाः शाश्वताः वेदमूलकमुपनिबद्धास्तेषां प्रतिपत्तिरत्र शिष्टानामाचारव्यवहा-राचरणादिभिर्द्योतते। अतः अस्य स्मृतेः प्रसक्तता नैतिकपरकत्वेन बहुधा विचार्यते। स्मृतिशास्त्रे नैतिकतत्त्वानि नैकानि अन्तर्हितानि विद्यन्ते। अतोऽस्य विचारो मनुस्मृतौ द्वितीयाध्याये मनुना बहुधा शिष्टानामाचारपरकत्वेन कीर्त्तितं वर्तते। यतः सदाचारः परमो धर्मः अहिंसादिभिः विचार्यते।

वेदोक्तो धर्मः श्रेष्ठो यश्च धर्मः सर्वैर्बहुधा परिपठ्यते शास्त्रान्तरेषु बहुधा च श्लाघ्यते। अन्यच्च शिष्टानां व्यवहारः साक्षाल्लक्षणसंयुक्तकमिति धर्मप्रामाण्यविदो मन्वादिभिस्मृतिशास्त्रेषु बहुधा उच्यते।

**"वेदोक्तः परमो धर्मो धर्मशास्त्रेषु चापरः।**
**शिष्टाचीर्णश्च शिष्टानां त्रिविधं धर्मलक्षणम्॥"[10]**

श्रुतिप्रामाण्येन स्मृतिर्लोकप्रशस्तिजननतया ब्रह्मचर्यगृहस्थवानप्रस्थसन्न्यासादयो नैके आश्रमधर्माः बहुधा व्याख्यायमास। तत्र धर्मतत्त्वं श्रुत्याधारेण लोकप्रवृत्तिजनकतया प्रवर्तते। यश्च धर्मो निखिललोककल्याणाय समाजस्योन्नतये बहुधा श्लाघ्यते। शास्त्रान्तरेष्वपि श्रुतेर्धर्मप्रामाणिकत्वं विन्दति।

**"विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।**
**हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधतः॥"[11]**

धारणपोषणार्थे वैदिकधर्मः सुतरां श्रुतिषु व्यवह्रियते। अस्यैव साक्षाद्धर्मस्य परिभाषा तन्मूलकतया स्मृतिशास्त्रेषु उपलक्ष्यते। धर्मस्य मूलतत्त्वानि शास्त्रोपसृष्टेभ्यः पालनपोषणार्थे सकलस्य संसारस्याधारत्वेन उपसेव्यन्ते। यश्च धर्मः प्रजानां धारणं पोषणं पालनं रक्षणं च विदधाति। यथोच्यते -

**"धारणाद्धर्मरित्याहुः धर्मो धारयते प्रजा।**
**यत्स्याद् धारणसंयुक्तं स धर्म इति निश्चयः॥"[12]**

अत्र चतुर्णामपि ब्रह्मक्षत्रवैश्यशूद्राणामाचारः परमधर्मः इति सिद्धान्तं प्रतिपाद्य तस्मिन्नेव सर्वे सततयुक्ताः समासाद्य कर्माणि गुणदोषपुरस्सरं सुतरामचरेयुरिति ख्यायते। अतोऽऽचारात्कदाचिदपि न वियुक्तो भूयात्। समेषां वर्णानां वर्णधर्माश्रमधर्मप्रसङ्गे उक्तानां कर्मणां सम्पादनं पुरस्सरमाचारयुक्तानि कर्माण्याचरयितुं सदैव शास्त्रेषु उच्यन्ते। यदाचारः सदाचारः श्रुत्युक्तो वा सुतरां स्यादिति। असावप्याचारो द्विजेन सदैव संसेव्य नित्यतदाधार-युक्तो भूत्वा तत्र स्मार्त्ते कर्मण्यपि तदात्मभाग् भवेत्। परन्तु तस्माद्विच्युतो जन्तु

कुत्रापि न स्थातुं शक्नोति। तेन भिन्नो जीवो नित्यं पापभाग्भूत्वा विविधेषु नरकेषु नाना यातनां लब्ध्वा असकृत्तत्र तत्र निपतति जराजन्मादिव्याधियुक्तो भूत्वा सुतरां तिष्ठेदिति च। तदर्थं तत्रैव मनुस्मृतौ प्रथमाध्याये अस्मिन् विषये स्पष्टीकृतं वर्तते यत् -

**आचाराद्विच्युतो विप्रो न वेदफलं अश्नुते।**

**आचारेण तु संयुक्तः सम्पूर्णफलभाज्भवेत्॥**[13]

आचारेण संयुक्तो विप्रो द्विजो वा सदैव इहलोके परलोके वेदफलमश्नुते तस्माद्भिन्नो जन्तुः कदाचिद् वा वेदफलं नाश्नुते। अतस्तावत्सुतरामाचारवान् भवेत्।

श्रुतिरपि आचारस्य सर्वश्रेष्ठत्वं विदधाति। श्रुतिषु यागादिरूप-धर्मतया तदङ्गतया यागे सर्वत्र हिंसायाः अभावश्च परिलक्ष्यते। यागेष्वपि सर्वेषु जन्तुषु दयाभावः आचारशास्त्रस्य परमं स्रोतः इति बहुधा श्रूयते। तदनुगुणतया अस्यां स्मृतौ आचारस्य परमधर्मपरकतया श्रेष्ठत्वं बहुधा श्लाघ्यते। मनुः वैदिकमार्गः सुतरां परामृशति। श्रुतिः धर्मे परमप्रामाण्यत्वेन सुतरां ध्यायते। यतो धर्मशास्त्रं श्रुत्युक्तमार्गे स्मार्त्तप्रक्रियायामाचारतत्त्वस्य सर्वेषु वर्णधर्मेषु आश्रमेषु च निर्यासतत्त्वत्वेन विदधाति। अतः कथ्यते तत्र मनुस्मृतौ मनुना यत् -

**एवं आचारतो दृष्ट्वा धर्मस्य मुनयो गतिम् ।**

**सर्वस्य तपसो मूलं आचारं जगृहुः परम्॥**[14]

अतः श्रुतिरेवाचारगतपरमधर्मत्वेन मनुस्मृतौ द्वितीयाध्याये बहुधा स्मर्यते। तत्र आचारेण युक्तो भूत्वा जन्तुः सदाचारपालनप्रसङ्गे सदैव तत्परो भूयादित्यर्थो भजते। अतः कथ्यते द्वितीयाध्याये तावद्वेदो धर्मस्य सर्वमूलत्वेन परिकीर्त्यते। वेदाधारेण स्मृतिः द्वितीयं प्रामाण्यं विन्दति। यतः श्रूयते तत्र मनुस्मृतौ -

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**

**आचारश्चैव साधूनां आत्मनस्तुष्टिरेव च॥**[15]

वेदेष्वाचारतत्त्वस्याभिव्यक्तिस्तु सुतरां मन्वत्रिभृगुप्रभृतिभिः स्मृतितत्त्वदर्शिभिराद्यं प्रामाण्यमिति सर्वथा स्वीक्रियते। तदर्थं श्रुत्याधारत्वेन स्मृतिग्रन्थस्य प्रसक्तिरिति साक्षात्तत् शब्दराशिः तस्मादाम्नाय प्रवर्तत इति मनुः ब्रवीति

**सन्दर्भग्रन्थसूची**

१. मनुस्मृतिः - मन्वर्थमुक्तावली सहिता, चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी, १९७०

२. चतुर्वर्गचिन्तमणिः, दानखण्डम्, चौखम्बा संस्कृत संस्थान, १९८५

३. महाभारत, भारतीय प्रकाशन संस्थान, गाजियाबाद, प्रथमसंस्करणम्, १९८८

४. याज्ञवल्क्यस्मृतिः - मिताक्षरासहिता, नागप्रकाशक, दिल्ली, २०११

५. धर्मशास्त्रेतिहासः - प्रो.जयकृष्णमिश्रः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०१०

६. वसिष्ठधर्मसूत्रम् - भण्डारकरप्राच्यविद्यासंशोधनागारः, पुण्य-पतनम्, १९३०

७. संस्कृतवाङ्मयकोशः -श्रीधरभास्करवर्णकर, वाणी पब्लिकेशन् राजस्तान

८. बौधायनधर्मसूत्रम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

**सङ्केताक्षरसूची**

1. म. स्मृ. १.१०८
2. म. स्मृ. १.१०१
3. म. स्मृ. ८.१७
4. चतु. चि. १.१४
5. तै. आ. १०.६३
6. व.ध.सू. ६.१
7. व.ध.सू. ६.४
8. व.ध.सू. ३.२.१ पृ. २०७
9. बौ.ध.सू. भूमिका पृ. २०
10. म. अ. प. ११.७८
11. म. स्मृ २.१
12. म. भा. क. प. ६९.५८
13. म. स्मृ १.१०९
14. म. स्मृ. १.११०
15. म. स्मृ.२.६